# RAMAKRISHNA MISSION VIDYAMANDIRA
**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, AUGUST 2021**
**SECOND YEAR [BATCH 2019-22]**
**SANSKRIT (HONOURS)**
**Paper : X [CC10]**

Date : 11/08/2021
Time : 11.00 am - 1.00 pm
Full Marks : 50

## UNIT-I

1. कस्यचि**<u>देकस्य</u>** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

क) स्वप्नवासवदत्तमिति नाटकस्य पञ्चमाङ्कमनुसृत्य स्वप्नदृश्यं वर्ण्यताम्। नाटकस्य नामकरणस्य याथार्थ्यं प्रतिपाद्यताम्। (7+3)

ख) यौगन्धरायणस्य चरित्रवैशिष्ट्यं विव्रियताम्।

2. अधोलिखितेषु श्लोकेषु कस्यचि**<u>देकस्य</u>** बङ्गभाषया अनुवादः करणीयः। [1×3]

क) कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः॥

ख) भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव॥

3. कस्यच**<u>नैकस्य</u>** श्लोकस्य व्याख्या कार्या। [1×7]

क) दुःखं त्यक्तं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह वाष्पम्
प्राप्तानृण्या याति बुद्धिः प्रसादम्॥

ख) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मा वनानां
काले काले छिद्यते रुह्यते च॥

## UNIT-II

4. कस्यचि**<u>देकस्य</u>** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

अभिज्ञानशकुन्तले हंसपदिकासङ्गीतेन कीदृशं नाट्योपयोगित्वं साधितमिति विचार्यताम्।

**<u>अभवा</u>**

अधोधृतेषु विषयेषु **<u>द्वयोः</u>** नाटकीयतात्पर्यं विव्रियताम्। (5+5)

क) सानुमतीवृत्तान्तः

ख) धनमित्रवृत्तम्

ग) मातलिवृत्तम्

5. अधस्तनयो**रेकः** वङ्गाङ्गलान्यतरभाषयानूद्यताम्। [1×5]

क) त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः।।

ख) वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति।।

6. कश्चि**देकः** सप्रसङ्गं व्याख्यायताम्। [1×7]

क) स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजः परभृताः खलु पोषयन्ति।।

ख) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असन्निवृत्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः।।

7. **सर्वे** प्रश्नाः समाधेयाः। [5]

क) तदतीतमेते अथवा स्त्रीणामशिक्षितपटुत्वममानुषीषु इति पदे सन्धिविच्छेदः कार्यः। (1)

ख) तटप्रपाताः इति अथवा वधूवरमिति पदे सविग्रहः समासो विलिख्यताम्। (2)

ग) वसाना अथवा प्रतिबोधवत्यः इति पदे प्रकृतिप्रत्ययनिर्देशः कार्यः। (1)

घ) अर्हताम् अथवा असन्निवृत्त्यै इति पदे विभक्तिकारणं निर्णीयताम्। (1)

8. कस्यचि**देकस्य** प्राकृतभाषातः संस्कृतभाषायां रूपान्तरं क्रियताम्। [1×3]

क) शहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकम्पामिदु एव्व शोत्तिए।।

ख) णावेक्खिओ गुरुअणो इमाए तुए पुच्छिदो ण बन्धुअणो।
एक्कक्कमेव्व चरिए भणामि किं एक्कमेकस्स।।

——— × ———